# संस्कृत वर्णमाला

डॉ. सुरेन्द्र कुमार शर्मा

माहेश्वरी प्रचलिता संस्कृते वर्णमातृका।
या वै पाणिनये पूर्वं सूत्रैः प्रोवाच शङ्करः।।1।।
1. अ इ उ ण्, 2. ऋ ऌ क् 3. ए ओ ङ् 4. ऐ औ च्
5. ह य व र ट्, 6. ल ण् 7. ञ म ङ ण न म् 8. झ भ ञ्
9. घ ढ ध ष् 10. ज ब ग ड द श्
11. ख फ छ ठ थ च ट त व् 12. क प य्
13. श ष स र् 14. ह ल्
माहेश्वराणि सूत्राणि तानीमानि चतुर्दश।
पाणिनिर्निजशास्त्रस्य मूलान्येतान्युवाच ह।।3।।
भाषाव्युत्पत्तिसिद्ध्यर्थं तपस्यामास्थितं मुनिम्।
डमरूनादनेनैव शिवः सूत्राण्युवाच ह।।4।।
एषु संस्कृतभाषाया वर्णमालोपदेशिता।
यस्यामायतते सर्वः पाणिनेः शास्त्रविस्तरः।।5।।
माहेश्वराणामेतेषां सूत्राणामन्तिमान्तिमाः।
हल् वर्णास्तु ये वै ते इतः पाणिनिना मताः।।6।।
सूत्रोक्तानां हि वर्णानां गणनावसरे त्विमे।
गणनातो बहिर्भूताः तस्मात् ते कथिता इतः।।7।।
महेश्वरोपदिष्टेषु मूलसूत्रेषु नैव ते।
किन्तु पाणिनिना पश्चात् स्वोपयोगाय योजिताः।।8।।
प्रत्याहारविधानार्थं तेषां सूत्रेषु योजनम्।
सम्बन्धितेषु वर्णेषु गणना नार्हतामपि।।9।।
प्रत्याहारो हि नैकेषां वर्णानामेकसंज्ञया।
समाहाराय संसृष्टा संज्ञा पाणिनिना स्वयम्।।10।।
पूर्वाक्षरेण केनापि सह संयोजनादिताम्।
जायते नामधेयं यत् प्रत्याहारः स उच्यते।।11।।

प्रत्याहारेण तत्रत्याः प्रथमाक्षरमिश्रिताः।
गृह्यन्ते मध्यमा वर्णाः किन्तु ते नान्तिमा इतः।।12।।
यथा हि अइउवर्णा अण्नाम्ना प्रतिसूचिताः।
इउऋलृ च चत्वारो वर्णा इगिति संज्ञिताः।।13।।
आद्यायां तु चतुःसूत्र्यां उपदिष्टाः स्वराक्षराः
ततः दशसु सूत्रेषु व्यञ्जनानां निदर्शनम्।।14।।
श्रवणग्रहणः शब्दो वर्णोऽवर्णश्च स द्विधा।
भाषात्मको भवेद्वर्णः निर्वर्णः केवलो ध्वनिः।।15।।
स्वरव्यञ्जनभेदेन वर्णशब्दो द्विधा भवेत्।
अन्यो भेरीमृदङ्गादिजन्यः शब्दो ध्वनिर्मतः।।16।।
(शब्दो वर्णात्मको द्वेधा स्वरव्यञ्जनरूपतः।
ध्वनिर्भेरीमृदङ्गादिशब्दो वर्णभिदां विना।।)
वर्णैः शब्दोदयः सार्थः सार्थैः शब्दैः पदोदयः।
पदैर्वाक्योदयश्चैनं भाषणं वर्णमूलकम्।।17।।
गद्यपद्यात्मकं लोके भाषणं द्विविधं मतम्।
गद्यं छन्दोविनिर्मुक्तं पद्यं छन्दसि संयतम्।।18।।
एकार्थसमवेतानाम् अन्वितानां परस्परम्।
सुप्तिङ्न्तपदानां हि सयो वाक्यमुच्यते।।20।।
अपदं न प्रयुञ्जीत विभक्त्यन्तीकृतं पदम्।
नामधात्वन्तयोगार्हा सुप्तिङ्शब्दा विभक्तयः।।21।।
सुबन्तं च तिङन्तं च द्विविधं पदमुच्यते।
सुबन्तं सुब्विभक्त्यन्तं तिङन्तं तिङविभक्तियुक्।।22।।
सुप्तिङन्तपदानां हि योजनातः परस्परम्।
वाक्यं निर्मीयते तच्च भाषणेषु प्रयुज्यते।।23।।
सुप्तिङन्तं विधायैव वक्तव्यं संस्कृते सदा।
अपदं न प्रयुञ्जीतेत्येतस्यार्थोऽयमेव हि।।24।।

*प्राचार्यचरः,*
*श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर*